**Series ΣHEFG/C** **Set-4**

प्रश्न-पत्र कोड
Q.P. Code **49**

रोल नं.
Roll No.

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

# संस्कृतम् (ऐच्छिकम्)
# SANSKRIT (Elective)

*समयः : होरात्रयम्* *पूर्णाङ्कः : 80*
*निर्धारित समय : 3 घण्टे* *अधिकतम अंक : 80*
*Time allowed : 3 hours* *Maximum Marks : 80*

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **19** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।

- Please check that this question paper contains **15** printed pages.
- Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **19** questions.
- **Please write down the serial number of the question in the answer-book before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

*निर्देशाः :*

- *(i)* *अस्मिन् प्रश्नपत्रे **पञ्च** खण्डाः सन्ति ।*
- *(ii)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयनि ।*
- *(iii)* *प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।*
- *(iv)* *सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।*
- *(v)* *प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।*

***प्रश्नपत्रस्वरुपम् :***

| | | | |
|---|---|---|---|
| खण्डः क | : | अपठित–अवबोधनम् | *10 अङ्काः* |
| खण्डः ख | : | रचनात्मक–कार्यम् | *10 अङ्काः* |
| खण्डः ग | : | अनुप्रयुक्त–व्याकरणम् | *15 अङ्काः* |
| खण्डः घ | : | (i) पठित–अवबोधनम् | *25 अङ्काः* |
| | | (ii) संस्कृतसाहित्येतिहासस्य सामान्यः परिचयः | *10 अङ्काः* |
| खण्डः ङ | : | छन्दोऽलङ्कारपरिचयः | *10 अङ्काः* |

## खण्डः क (SECTION A)
## अपठित – अवबोधनम्
## अपठित – अवबोधन
## Unseen Reading Comprehension *10 अङ्काः*

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following passage and answer the given questions in Sanskrit.

कौशलदेशे नृसिंहो नाम राजा राज्यं करोति स्म । तेन घोषणा कारिता यत् यो जनः श्वः सायंकाले मया सह मेलनं करिष्यति तस्मै जनाय अहं स्वराज्यस्य एकं भागं दास्यामि । निश्चितसमये राजा राजप्रासादस्य उद्याने विशालोत्सवस्य आयोजनं कृतवान् । तत्र अनेकानि सुरसानि भोज्यपदार्थानि आसन् । उत्सवे नृत्यस्य क्रीडानामपि च आयोजनम् आसीत् । ये जनाः

राजप्रासादम् आगतवन्तः, तेषु केचन भोज्यपदार्थेषु, केचन नृत्ये, केचन क्रीडासु मग्नाः जाताः । परं तेषु एकः युवकः लक्ष्यं प्रति एकाग्रचित्तः आसीत् । स उत्सवं प्रति आकृष्टः न अभवत् । सः समक्षं प्रासादस्य द्वारं प्रति एव अचलत् । तत्र रक्षकाः आसन् । सः तान् अपसार्य राजप्रासादे प्रवेशम् अकरोत् । राजा आगतं युवकं दृष्ट्वा प्रसन्नोऽभवत् उक्तवान् च — अहो ! मम राज्ये एतादृशोऽपि जनः अस्ति यस्य प्रलोभनेषु आसक्तिः नास्ति । भवान् तु केवलं लक्ष्यं प्रति जागरूकः । अहं भवते राज्यस्य एकं भागं न दास्यामि अपितु भवान् मम उत्तराधिकारी भविष्यति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) *2×1=2*

(i) नृसिंहः कुत्र राज्यं करोति स्म ?

(ii) उत्सवस्य आयोजनं कुत्र अभवत् ?

(iii) राजा कं दृष्ट्वा प्रसन्नोऽभवत् ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×2=4*

(i) राज्ञा का घोषणा कारिता ?

(ii) जनाः कुत्र मग्नाः जाताः ?

(iii) राजा आगतं युवानं दृष्ट्वा प्रसन्नः सन् किम् उक्तवान् ?

(इ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत ।
इस गद्यांश के लिए उपयुक्त शीर्षक लिखिए ।
Write a suitable title for this passage. *1×1=1*

(ई) यथानिर्देशम् उत्तरत । (केवलं प्रश्नत्रयम्)
यथानिर्देश उत्तर दीजिए । (केवल तीन प्रश्न)
Answer as directed. (Only three questions) *3×1=3*

(i) भोज्यपदार्थानि इति विशेष्यपदस्य विशेषणपदं किम् ?

(ii) 'ह्यः' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत ।

(iii) 'प्रहरिणः' इति पदस्य पर्यायं गद्यांशात् चित्वा लिखत ।

(iv) 'स उत्सवं प्रति आकृष्टः न अभवत्' अत्र 'स' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

## खण्डः ख (SECTION B)

## रचनात्मक – कार्यम्

## रचनात्मक – कार्य

## Writing Skills

*10 अङ्काः*

**2.** भवान्/भवती वा हरिद्वारे वसति । तत्र हरिद्वारनगरस्य वैशिष्ट्यं वर्णयन्/वर्णयन्ती दिल्लीवासिनं स्वमित्रं प्रति मञ्जूषायां प्रदत्तसङ्केतानां सहायतया पत्रमेकं लिखत । *5*

**मञ्जूषा**

| |
|---|
| उत्तराञ्चलस्य, प्रसिद्धम्, नमो नमः, गङ्गानद्याः, पर्यटकाः, गुरुकुल कांगड़ी विश्वविद्यालयः, प्राकृतिकं सौन्दर्यम्, तीर्थस्थानम्, ऋषीकेशः, ग्रीष्मावकाशे, दर्शनीयस्थानानि, सपरिवारः, आगच्छतु, प्रणामान्, निवेदयतु, प्रसिद्धम्, योगकेन्द्रम् । |

**अथवा (OR)**

स्वविद्यालयस्य प्रधानाचार्यं प्रति पत्रं लिखित्वा निवेदयतु यत् क्रीडाङ्गणे छात्राणां कृते विविधक्रीडानां व्यवस्थां कारयतु । *5*

**मञ्जूषा**

| |
|---|
| श्रीमत्यः/श्रीमन्तः प्रधानाचार्याः, महोदये/महोदय, स्वास्थ्यवर्धनाय, क्रीडाङ्गणम्, सुन्दरम्, क्रीडाकौशल-विकासाय, छात्राणां रुच्यनुकूलं, क्रीडानाम्, खेलनाय क्रीडासामग्रीः, क्रिकेटम्, वालीबालः, पादकन्दुकम्, कबड्डी-प्रभृति खेलानाम्, कारयतु, विशालं, धन्यवादाः, भवताम् आज्ञाकारी, सविनयं निवेदनम् । |

**3.** प्रदत्ततथ्यानां सहायता अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत ।
दिए गए तथ्यों की सहायता से निम्नलिखित विषय पर संस्कृत में एक अनुच्छेद लिखिए ।
Write a paragraph in Sanskrit on the given topic with the help of given facts. *5*

**विषयः – संगणकम्**

प्रस्तावना
संगणकस्य महत्त्वम्
संगणकस्य उपयोगिता
उपसंहारः

**अथवा (OR)**

**विषयः – अनुशासनम्**

अनुशासनस्य अभिप्रायः
अनुशासनस्य आवश्यकता
जीवने अनुशासनस्य महत्त्वम्
उपसंहारः

**अथवा (OR)**

अधोलिखितवाक्येषु केषाञ्चन **पञ्च**वाक्यानां संस्कृतेन अनुवादं कुरुत ।
निम्नलिखित वाक्यों में से किन्हीं **पाँच** वाक्यों का संस्कृत में अनुवाद कीजिए ।
Translate any **five** sentences in Sanskrit from the following. *5×1=5*

(i) राम मोहन का मित्र है ।
Ram is a friend of Mohan.

(ii) हम सब कल बाग में जाएँगे ।
We will go to the garden tomorrow.

(iii) मनोज ने अपने पिता को एक पत्र लिखा ।
Manoj has written a letter to his father.

(iv) वृक्ष पर पक्षी बैठे हैं ।
Birds are sitting on the tree.

(v) छात्र कक्षा में पढ़ते हैं ।
Students are studying in the class.

(vi) दीपक ने कलम से एक पत्र लिखा ।
Deepak has written a letter with the pen.

(vii) सदा सत्य बोलना चाहिए ।
One should always speak the truth.

## खण्डः ग (SECTION C)

## अनुप्रयुक्त – व्याकरणम्
## अनुप्रयुक्त – व्याकरण
## Applied Grammar

*15 अङ्काः*

**4.** अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत । (केवलं प्रश्नत्रयम्)
निम्नलिखित वाक्यों में रेखाङ्कित पदों में सन्धि अथवा सन्धि-विच्छेद करके लिखिए । (केवल तीन प्रश्न)
Write the Sandhi forms or the forms of disjoining the Sandhis in the underlined words in the following sentences. (Only three questions) *3×1=3*

(क) संवृत्तिः प्रतिबिम्बितेव निखिला सैवाकृतिः साद्युतिः ।

(ख) सु + आगतम् अत्र भवताम् कक्षायाम् ।

(ग) पुनरपि राजा सिंहासने समुपवेष्टुं गच्छति ।

(घ) अधुनात्र शताधिका अनाथशिशवो लालिताः पालिताः + च भवन्ति ।

**5.** रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं चित्वा लिखत । (केवलं प्रश्नत्रयम्)
रेखाङ्कित पदों में प्रकृति प्रत्यय को संयुक्त अथवा विभक्त कर उचित उत्तर चुनकर लिखिए । (केवल तीन प्रश्न)
Select the appropriate answer by joining or disjoining the base element and the suffix element in the underlined words. (Only three questions) *3×1=3*

(क) धनविषये सञ्चयः न कर्तव्यः ।
(a) कृ + तव्यत् (b) कृ + क्तवतु
(c) कृ + क्तिन् (d) कृत + अनीयर

(ख) सुलभसौख्यमिदानीं बाल + त्व भवति ।
(a) बालता (b) बालतः
(c) बाला (d) बालत्वम्

(ग) लब्धं कुबेराद् अभियास्यमानात् ।
(a) लभ् + क्त (b) लभ् + क्तवतु
(c) लभ् + टाप् (d) लभ् + शतृ

(घ) योगाङ्गानां ज्ञातुं महत् + ङीप् उत्कण्ठा वर्तते ।
(a) महता (b) महती
(c) महन्ती (d) महान्

**6.** मञ्जूषायां प्रदत्तैः समुचितैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि लिखत ।

(केवलं प्रश्नत्रयम्)

मञ्जूषा में दिए गए समुचित अव्यय पदों से रिक्तस्थान पूर्ण कर वाक्य लिखिए ।

(केवल तीन प्रश्न)

Write the sentences after filling in the blanks with appropriate indeclinables given in the box. (Only three questions) *3×1=3*

(क) जात ! _________ जीव ।

(ख) श्रीनायारः ओडिशा सर्वकारस्य अधीने _________ वर्षत्रयेभ्यः कार्यं करोति ।

(ग) पुत्तलिकायाः वचनं श्रुत्वा राजा _________ आसीत् ।

(घ) लब्धापि _________ दुःखेन परिपाल्यते ।

**मञ्जूषा**

| खलु, चिरम्, तूष्णीम्, प्रायः |
|---|

**7.** कोष्ठके प्रदत्तशब्देषु समुचितां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत । (केवलं प्रश्नत्रयम्)

कोष्ठक में दिए गए शब्दों में उचित विभक्ति प्रयोग कर रिक्त स्थान पूर्ण कीजिए ।

(केवल तीन प्रश्न)

Fill in the blanks after applying the appropriate case endings in the words given in the brackets. (Only three question) *3×1=3*

(क) शिववीरचरः _________ न विरमति । (निजकार्य)

(ख) किं वस्तु विद्वन् ! _________ प्रदेयम् ? (गुरु)

(ग) तस्य _________ सह अस्ति सम्पर्कः । (राज्य)

(घ) अलं _________, एकैकं बोधयामि । (चिन्ता)

**8.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं विग्रहं समासं वा चित्वा लिखत ।

(केवलं प्रश्नत्रयम्)

निम्नलिखित वाक्यों में रेखांकित पदों के समुचित विग्रह अथवा समास चुनकर लिखिए ।

(केवल तीन प्रश्न)

Write the vigraha (the descriptive sentences) or the compounds of the underlined words of the following sentences. (Only three questions) *3×1=3*

(क) <u>दीर्घग्रीवः</u> स भवति खुरास्तस्य चत्वार एव ।

(a) ग्रीवया दीर्घेण     (b) दीर्घा ग्रीवा यस्य सः

(c) दीर्घया ग्रीवा     (d) दीर्घः च ग्रीवः च

(ख) तं बहु मन्यन्ते यो अहः च निशा च तयोः समाहारः अनवरतं विगतान्यकर्त्तव्यः स्तौति ।

(a) अहर्निशः (b) अहर्निशा

(c) अहर्निशम् (d) अहर्निशया

(ग) तमर्चयित्वा विधिवद्विधिज्ञः तपः धनं यस्य सः तम् मानधनाग्रयायी ।

(a) तपधनः (b) तपोधनम्

(c) तपोधनः (d) तपधनानि

(घ) सर्वापि यज्ञसामग्री समहृता ।

(a) यज्ञाय सामग्री (b) यज्ञस्य सामग्री

(c) यज्ञे सामग्री (d) यजन सामग्री

## खण्डः घ (SECTION D)

## (i) पठित – अवबोधनम्

## पठित – अवबोधन

## Reading Comprehension

*25 अङ्काः*

**9.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following passage and answer the given questions in Sanskrit.

भवादृशा एव भवन्ति भाजनान्युपदेशानाम् । अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः । हरति अतिमलिनमपि दोषजातं गुरूपदेशः । गुरूपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम् । विशेषेण तु राज्ञाम् विरला हि तेषामुपदेष्टारः । राजवचनमनुगच्छति जनो भयात् । उपदिश्यमानमपि ते न शृण्वन्ति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) राज्ञां कृते के विरलाः भवन्ति ?

(ii) भवादृशा एव केषां भाजनानि भवन्ति ?

(iii) कीदृशे मनसि उपदेशगुणाः सुखेन विशन्ति ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×1=2*

(i) गुरूपदेशः कीदृशं स्नानं भवति ?

(ii) गुरूपदेशः किं हरति ?

(iii) जनः भयात् कम् अनुगच्छति ?

(इ) यथानिर्देशम् उत्तरत । (केवलं प्रश्नद्वयम्)
यथानिर्देश उत्तर दीजिए । (केवल दो प्रश्न)
Answer as directed. (Only two questions) *2×1=2*

(i) 'उपदिश्यमानमपि ते न शृण्वन्ति' अत्र वाक्ये कर्तृपदं किं प्रयुक्तम् ?

(ii) 'मनसि' इति पदस्य विशेषणपदं किं प्रयुक्तम् ?

(iii) 'नृपाणाम्' इति पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत ।

**10.** अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following poetry and answer the given questions in Sanskrit.

निर्बन्धसञ्जातरुषार्थकार्श्य-मचिन्तयित्वा गुरुणाहमुक्तः ।
वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति ।।

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) कौत्सस्य अर्थकार्श्यम् कः न अचिन्तयत् ?

(ii) कौत्सः कया संख्यया गुरवे धनम् आहरेत् ?

(iii) केन रुषा कौत्सः उक्तः ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) *2×1=2*

(i) शिष्यस्य किम् अचिन्तयित्वा एव गुरुणा शिष्यः उक्तः ?

(ii) गुरुः कौत्सं किम् अकथयत् ?

(iii) कति विद्याः सन्ति ?

(इ) यथानिर्देशम् उत्तरत । (केवलं प्रश्नद्वयम्)
यथानिर्देश उत्तर दीजिए । (केवल दो प्रश्न)
Answer as directed. (Only two questions) $2\times1=2$

(i) 'त्वम्' इति कर्तृपदस्य क्रियापदं किम् उक्तम् ?
(ii) 'धनस्य' इति पर्यायपदं किमागतं श्लोके ?
(iii) 'चतस्रो दश च' इति पदयोः विशेष्यपदं किम् उक्तम् ?

**11.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following drama passage and answer the given questions in Sanskrit.

**नाट्यांशः**

*बटवः* — भो भो ! किं प्रयोजनोऽयमश्वः परिवृतः पर्यटति ?

*लवः* — (सस्पृहमात्मगतम्) 'अश्वमेध' इति नाम विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रपरिभावी महान् उत्कर्षनिकषः ।
(नेपथ्ये)
योऽयमश्वः पताकेयमथवा वीरघोषणा ।
सप्तलोकैकवीरस्य दशकुलकण्ठद्विषः ।।

*लवः* — (सगर्वम्) अहो ! सन्दीपनान्यक्षराणि ।

*वटवः* — किमुच्यते ? प्राज्ञः खलु कुमारः ।

*लवः* — भो भोः ! तत्किमक्षत्रिया पृथिवी ? यदेवमुद्घोष्यते ? (नेपथ्ये)
रे, रे महाराजं प्रति कः क्षत्रियः ?

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) $2\times\frac{1}{2}=1$

(i) कं प्रति कोऽपि क्षत्रियः न वर्तते ?
(ii) 'तत्किमक्षत्रिया पृथिवी' इति कः वदति ?
(iii) कुमारः कीदृशः ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) $2\times1=2$

(i) कानि सन्दीपनानि वर्तन्ते ?
(ii) पताका कस्य अस्ति ?
(iii) 'अश्वमेध' इति केषाम् उत्कर्षनिकषः भवति ?

(इ) यथानिर्देशम् उत्तरत । (केवलं प्रश्नद्वयम्)
यथानिर्देश उत्तर दीजिए । (केवल दो प्रश्न)
Answer as directed. (Only two questions) *2×1=2*

(i) 'पर्यटति' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

(ii) 'अक्षत्रिया' इति विशेषणपदस्य विशेष्यपदं किम् उक्तम् ?

(iii) 'मन्दः' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

**12.** अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । (केवलं प्रश्नचतुष्टयम्)
निम्नलिखित वाक्यों में रेखाङ्कित पदों के आधार पर प्रश्ननिर्माण कीजिए । (केवल चार प्रश्न)
Write interrogative word on the basis of the underlined words in the following sentences. (Only four questions) *4×1=4*

(i) कुर्वन्नेवेह <u>कर्माणि</u> जिजीविषेच्छतं समाः ।

(ii) दिदेश <u>कौत्साय</u> समस्तमेव पादं सुमेरोरिव वज्रभिन्नम् ।

(iii) तस्येप्सितं <u>देवः</u> सम्पादयति ।

(iv) विक्रमार्को राजा <u>यज्ञं</u> करोति ।

(v) इदानीं तु <u>योगशिक्षायाः</u> कालांशः ।

**13.** अधोलिखितस्य श्लोकस्य अन्वयं लिखत ।
निम्नलिखित श्लोक का अन्वय लिखिए ।
Write the prose-order of the following verse. *3*

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ।।

**14.** अधोलिखितस्य श्लोकस्य भावार्थं संस्कृतभाषया लिखत ।
निम्नलिखित श्लोक का भावार्थ संस्कृत भाषा में लिखिए ।
Write the substance of the following 'shloka's in Sanskrit. *3*

दातव्यं भोक्तव्यं धनविषये सञ्चयो न कर्त्तव्यः ।
पश्येह मधुकरीणां सञ्चितमर्थं हरन्त्यन्ये ।।

**अथवा (OR)**

'कार्यं वा साधयेयम्, देहं वा पातयेयम्' इति पाठम् आधृत्य शिववीरदूतस्य (गुप्तचरस्य) चरित्रचित्रणं संक्षेपेण संस्कृतभाषया लिखत ।

'कार्यं वा साधयेयम्, देहं वा पातयेयम्' पाठ के आधार पर शिवाजी के दूत (गुप्तचर) का चरित्र-चित्रण संक्षेप में सरल संस्कृत भाषा में लिखिए ।

On the basis of the given lession 'कार्यं वा साधयेयम्, देहं वा पातयेयम्' write the character of Shivaji's massenger in simple Sanskrit. *3*

**(ii) संस्कृतसाहित्येतिहासस्य सामान्यः परिचयः**

**संस्कृत साहित्य – सामान्य परिचय**

**Sanskrit Literature General Introduction** *10 अङ्काः*

**15.** अधोलिखित प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नत्रयम्)

निम्नलिखित प्रश्नों के उत्तर दिए गए विकल्पों से चुनकर लिखिए । (केवल तीन प्रश्न)

Choose the answer of the following questions from the given options.

(Only three questions) *3×1=3*

(क) रघुवंशस्य कस्मिन् सर्गे राज्ञः दिलीपस्य वर्णनमस्ति ?

(a) प्रथम सर्गे (b) द्वितीय सर्गे

(c) सप्तम सर्गे (d) द्वादश सर्गे

(ख) 'किरातार्जुनीयम्' इति महाकाव्यस्य रचयिता कः आसीत् ?

(a) भट्टिः (b) माघः

(c) भारविः (d) कालिदासः

(ग) 'नैषधीयचरितम्' इति महाकाव्ये कस्य राज्ञः वर्णनम् अस्ति ?

(a) नलस्य (b) दुष्यन्तस्य

(c) हर्षवर्धनस्य (d) विक्रमादित्यस्य

(घ) 'कल्हणः' किम् ऐतिहासिकं महाकाव्यम् अरचयत् ?

(a) हर्षचरितम् (b) नवसाहसाङ्कचरितम्

(c) कुमारपालचरितम् (d) राजतरङ्गिणी

**16.** अधोलिखितप्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत । (केवलं प्रश्नत्रयम्)
निम्नलिखित प्रश्नों के उत्तर प्रदत्त विकल्पों से चुनकर लिखिए । (केवल तीन प्रश्न)
Choose the answers of the following questions from the given options.
(Only three questions) *3×1=3*

(क) चम्पूकाव्यं किं भवति ?
(a) संवादात्मकम् (b) गद्यमयम्
(c) पद्यमयम् (d) गद्यपद्यमयम्

(ख) मृच्छकटिकरूपकस्य नायकः कः अस्ति ?
(a) चाणक्यः (b) चारुदत्तः
(c) रोहसेनः (d) उदयनः

(ग) एतेषु कः कथाग्रन्थः नास्ति ?
(a) पञ्चतन्त्रम् (b) कादम्बरी
(c) मेघदूतम् (d) हितोपदेशः

(घ) आधुनिक-उपन्यास शैल्यां लिखितं गद्यकाव्यं किम् ?
(a) शुकसप्ततिः (b) बृहत्कथा
(c) मुद्राराक्षसम् (d) शिवराजविजयम्

**17.** प्रदत्तविकल्पेभ्यः समुचितम् उचितं चित्वा लिखत । (केवलं प्रश्नचतुष्टयम्)
दिए गए विकल्पों से उचित उत्तर चुनकर लिखिए । (केवल चार प्रश्न)
Write the complete answer from the given options. (Only four questions) *4×1=4*

(क) भरतमुनिः कं ग्रन्थं रचितवान् ?
(a) मालविकाग्निमित्रम् (b) वेणीसंहारम्
(c) दशकुमारचरितम् (d) नाट्यशास्त्रम्

(ख) स्वप्नवासवदत्तस्य नायकः कः ?
(a) हर्षः (b) उदयनः
(c) दिलीपः (d) चारुदत्तः

(ग) 'मुद्राराक्षसम्' नाटकस्य रचनाकारः कः ?
(a) हर्षः (b) भवभूतिः
(c) विशाखदत्तः (d) भासः

(घ) अश्वघोषस्य प्रसिद्धं रूपकं किमस्ति ?

(a) शारिपुत्रप्रकरणम् (b) रत्नावली
(c) मालतीमाधवम् (d) बालरामायणम्

(ङ) उत्तररामचरितम् नाटकस्य प्रधानरसः कः अस्ति ?

(a) वीररसः (b) हास्यरसः
(c) शान्तरसः (d) करुणरसः

## खण्डः ङ (SECTION E)

## छन्दोऽलङ्कारपरिचयः

## छन्द एवं अलङ्कार परिचय

## Metres and Figures of Speech

*10 अङ्काः*

**18.** (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्)

निम्नलिखित प्रश्नों के उत्तर लिखिए । (केवल तीन प्रश्न)

Answer the following questions. (Only three questions) *3×1=3*

(क) ‘जगण’ इत्यस्य सङ्क्षिप्त चिन्हानि कानि सन्ति ?

(ख) ‘अनुष्टुप्’ छन्दसः एकम् उदाहरणं लिखत ।

(ग) ‘मालिनी’ छन्दसः लक्षणं किम् ?

(घ) ‘रसैरूद्रैश्छिन्ना यमनसभलाग’ इति कस्य छन्दसः लक्षणम् अस्ति ?

(आ) अधोलिखितासु श्लोकपंक्तिषु प्रयुक्तं छन्दसं परिचीय तस्य नाम लिखत । (केवलं प्रश्नद्वयम्)

नीचे लिखी श्लोक पंक्तियों में प्रयुक्त छन्द को पहचान कर उसका नाम लिखिए । (केवल दो प्रश्न)

Identify and write the name of the छन्द used in the given below shloka.

(Only two questions) *2×1=2*

(क) पापान्निवारयति योजयते हिताय,
गुह्यं निगूहति गुणान् प्रकटीकरोति ।

(ख) पश्चात् पुच्छं वहति विपुलं तच्च धूनोत्यजस्रम्
दीर्घग्रीवः स भवति, खुरास्तस्य चत्वार एव ।

(ग) अस्त्युत्तरस्यां दिशि देवतात्मा, हिमालयो नाम नगाधिराजः ।

**19.** (अ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत । (केवलं प्रश्नत्रयम्)

निम्नलिखित प्रश्नों के उत्तर लिखिए । (केवल तीन प्रश्न)

Answer the following questions. (Only three questions) *3×1=3*

(क) रूपकालङ्कारस्य लक्षणं लिखत ।

(ख) अनुप्रासालङ्कारस्य लक्षणं किम् ? लिखत ।

(ग) यमकालङ्कारस्य एकम् उदाहरणं लिखत ।

(घ) 'भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना' इति कस्यालङ्कारस्य लक्षणम् अस्ति ?

(आ) अधोलिखितासु श्लोकपङ्क्तिषु प्रयुक्तालङ्कारस्य नाम लिखत । (केवलं प्रश्नद्वयम्)

नीचे लिखी श्लोक पंक्तियों में प्रयुक्त अलंकारों के नाम लिखिए । (केवल दो प्रश्न)

Write the name of the 'अलंकार' in the given below shloka's.

(Only two questions) *2×1=2*

(क) उच्छलद् भूरि कीलालः शुशुभे वाहिनीपतिः ।

(ख) अनलङ्कृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम् ।

(ग) वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्वसन्ति ।